। सरस्वती श्रुतिमहती महीयताम् ।

संस्कृतविद्वत्सभा – वटपत्तनम्

(स्थापना : सं. २००५ वसन्तपञ्चम्याम्)

पण्डित पञ्चानन – विद्यासुधानिधि – अभिनवजयदेव – विद्वद्वरेण्य-

श्रीमद् बदरीनाथ शास्त्रिणाम्

प्रतिवादि भयङ्कर–विद्याभास्कर–सकलशास्त्रपारङ्गत–पण्डितप्रवर-

श्रीमद् मणिशङ्कर उपाध्यायमहोदयानाञ्च

दिव्यस्मृतौ

" संस्कृत मण्डलगानानि "

(संस्कृत गरबा)

संवत् - २०३९ आश्विन शुक्ल, १० विजयादशमी दि. १६-१०-१९८३

प्रकाशिका - संस्कृतविद्वत्सभा, वटपत्तनम् ।

संकलनम् - कञ्चनलाल हीरालाल परीख ।
भूतपूर्व-प्रकाशनमन्त्री
संस्कृतविद्वत्सभा, वडोदरा ।

प्रथमावृत्तिः १००० पुस्तकानि
संवत् २०१९

द्वितीयावृत्तिः (संशोधिता) : १००० पुस्तकानि
संवत २०२२

तृतीयावृत्तिः (संशोधिता) : १००० पुस्तकानि
आश्विन शुक्ल १०,
विजयादशमी संवत्-२०३९
दि. १६-१०-८३

मुद्रकः ३ अे असोशिअेटस्, विश्वकर्मा भुवन, खारीवाव,
वडोदरा-३९०००१

प्राप्तिस्थानम् : कार्यालयः – द्वारकाधीशसदनम्,
नरसिंहजीनो पोळ, वडोदरा-३९०००१

क्रमाङ्कः

सूची

पृष्ठम

क्रमाङ्कः		पृष्ठम
	प्रास्ताविकम् ।	I, II, III
	प्रासङ्गिकम्	IV, V, VI
	प्रार्थना	VII
	श्रीमद्गोपालाष्टपदी	VIII, IX
१	जय जय जय गोपीज ल्लभ	१
२	जयति निखिलविबुधवृन्द	१
३	मातः शारदे वन्दे ते	२
४	शारदे पालय पालय माम्	२
५	वन्दे पादयुगं ते मातः शारदे रे पाहि	३
६	संस्कृतभाषारसमुद्वहतामुदारनीतिमतां	४
७	सुरभाषेयं वरभाषेयं भवतादभीष्टदायिनी	५
८	मम चित्तं सदा स्मरतात् श्यामधाम कमनीयम्	५
९	तीरं स्मरामि गोविन्द यामुनं तीरं स्मरामि	६
१०	नाथ हरे जय नाथ हरे सीदति राधा वासगृहे	६
११	देवि तव प्रभा भासते मानवलोके	७
१२	श्यामवर्णसमीपे न यामि, सखि नैव यामि	८
१३	यशोवतां स्वागतं वयं भावयामः	९
१४	त्वं मया वारितोऽसि पूर्वमेव कीर	९
१५	वन्दन्ते यामखिलसुमनसो नियमितमनसो	१०
१६	श्रय नन्दकुमारं निर्जितमारं सारं दिव्यगिराम्	११
१७	प्रबुद्धा भारती रे, प्रयाता मारुतीमाशाम्	१२
१८	सर्वदैव गोपालबाल भावये रूपं त्वदीयम्	१३
१९	पश्य शारदी विभाति दिव्ययामिनी	१४
२०	यात भो युवानः संगरावनिं बद्धशस्त्रश्रमं	१५
२१	श्रितकमलाकुचमण्डल धृतकुण्डल ए	१७

२२	भावो भृशमेधते (२) मम पुम्भावे	१८
२३	रक्षणे समुद्यता सदैव या दिवौकसाम्	१८-१९
२४	भारतं सर्वदैव शून्यं भवेत् भाषा तदीया संस्कृतं न चेत्	२०
२५	हो बाल रे, दारुणे संसारे करुणाधारो	२१-२२
२६	जय हे सरस्वति शारदे भवपारदे वरदे।	२३
२७	सदा ब्रह्मेश्वरं स्मरतात् तस्य नाम मननीयम्	२३
२८	शिव साम्ब हे।	२४-२५
२९	भगवति वाणि पादं नमामि।	२६
३०	जयतात् सुरभारती (२) इह सततं (२)	२६
३१	जय कालिके करुणैकनिधे। जगदम्बिके सदये रसिके॥	२७
३२	गुरुरेव विधिर्गुरुरेव हरिर्गुरुरेव हरो भवसंहारो।	२८
३३	या दिविजैः संपूजिता नन्दनभवकुसुमावल्या	२९
३४	शुभारविन्दस्थां, कदाचिन्, मरालराजस्थां	३०
३५	मञ्जु यातु मञ्जु मनो मामकम्	३१
३६	चकितमिह विलोकयामि कमलनयनमीश्वरम्	३२
३७	कमलनयन देहि चरणसेवाम् कमल०	३२
३८	परिचेया परिचेया सौरी भाषेयम्	३३
३९	कवलितनवनवनीतभरितमुखपङ्कजमखिलेशम्।	३४
४०	जय जय गिरिवरधारिन् रासविहारिन्	३४
४१	एत खेटकं व्रजेम भूरिवातम्, मन्दमालोक्यते प्रभातम्	३५
४२	जगदम्ब, राजताद्दिव्यं तव रूपम्	३६
४३	वन्दनीयरूपे हो चिन्तनीयरूपे देवि, पालय	३७
४४	पर्वपुण्ययामिनी प्रमोदमन्तरे किरेत्	३८
४५	कोकिलशुकसारिकामयूर नाद नादिते	३९
४६	अयि मङ्गलदायिनि विश्वविलासिनि	४०
४७	अवतरणावितभूतल त्रिगुणात्मक ए	४१
४८	जय शिव शूलिन् साम्ब सनातन, विश्वविधातः पाहि विभो	४२

४९	कमलदलोच्छलदम्बुकणाभं, मानसममलं दधताम् ।	४३
५०-	शारदे तवातिरम्यपादयोर्मानसं सदैव मोदताम् ।	४४
५१	जनिमृतिसंसृतिजाले मग्नम्, तापत्रयसंतापितमनुजम्	४५
५२	तव चरणं शरणं यामि विभो	४६
५३	किं तन्न न यत्र शम्भो...... भूमा विराजते ते	४७
५४	तव कृपा शङ्कर विजयताम्	४८
५५	रासे हरिमिह विहितविलासम्	४९
५६	शान्तमना: कोऽपि योगिराड्	४९
५७	रङ्गपादपद्मसमाराधनं	५१
५८	मुरलीधारिन्, वितर कृपां	५२
५९	शारदां भजामो रे,	५३
६०	हे भारतदेशोऽस्ति देव ज्ञानदायको	५४
६१	सुरवाक् प्रशस्ति:	५५
६२	शिवाशंसा—वय व्रजाम: स्वं गेहं	
६३	संस्कृतविद्वत्सभागीतम—नन्दनविपिनं भारतम्	
५४	वन्दे देवीं शारदाम	*VII*
५५	श्रीमद् गोपालाष्टपदी	*VIII*

संस्कृतगेयपद्य (मण्डलगान) पुस्तिका

प्रास्ताविकम्

भारतीयसंस्कृतेर्देशभाषाणां भूमण्डलीयसमस्तभाषाणाञ्च प्रकृतिभूता संजीवनी संस्कृतभाषा स्वीयाप्रतिमनिर्मितिकौशलगौरवाभ्यां नानारूपेण विभासमानाऽद्यापि समुन्नतशिरसा जगति जीवति। अण्वभ्रष्टपोतं मातेव सर्वा भाषाः स्वीयपीयूषपानेन क्रोडीकृत्य संवर्धयति। सेयममरवाणी लोकव्यवहारात् सुदूरं स्थितेति वदन्तो दिवा तिमिरस्थितिं वर्णयन्तः स्वात्मानं वञ्चयन्ति। सर्वशः पटे सूत्रमिव संलग्ना समीपं वर्तमानाऽपि नास्तीति व्यपदिश्यते जनैः।

शताधिकजनसंवृतस्य कुटुम्बस्य नियमनिरपेक्षत्वे पर्याकुलीभावः स्यादिति नियतिनिबद्धजगज्जालमिव संस्कृत वाङ्मयं नियमसापेक्षं सदैव संस्कृतमित्युच्यते। अस्मिन्नप्रतिमे सनातनवाङ्मये श्रीराधाकृष्णगतभक्तिभावसभरैः श्रीजयदेवकविराजैः सङ्गीतलयतालानुरोधेन श्रीजगदीशभगवदनुकम्पायै 'गीतगोविन्द' महाकाव्यं व्यरचि।

'यः खलु कृत्स्नमात्मानं मन्यते स खलु गीत एवाभिरमते' इति श्रुतिवाक्यात् स्वात्मानन्दपरिपाकरूपं गीतम्, तस्य वाद्यं नृत्यञ्च परिपोषकमिति समेषां सुविदितचरम्।

भारतीयसर्वप्रदेशेषु तैस्तैर्विशिष्टैः प्रकारै रास-मण्डलगानादिकं वाद्यनृत्यसमवेतमद्याप्यापामरात् सहृदयं यावद् विराजमानमानन्दमहोदधौ रसिकजनं निमज्जयति।

वैशिष्ट्येन [गुर्जरसौराष्ट्रप्रान्तेषु] शारदनवरात्रेऽन्येषूत्सवेषु च रासमण्डलगानाद्यानन्दसन्दोह आबालयुवप्रौढवृद्धं स्त्रीपुम्भिदामपहाय प्रतिहायनं] देशभाषासूत्सूयते। सं. २००५ वसन्तपञ्चम्यां प्रतिष्ठापिताया वटपत्तनस्थसंस्कृतविद्वत्सभाया अध्यक्षवर्यैः पण्डितपञ्चाननविद्यासुधानिधिविद्वद्वरेण्य श्रीबदरीनाथशास्त्रिचरणैः संस्कृतभाषायां मण्डलगानरचना सर्वसामान्यलोकभोग्या पदवीमारोपिता। अन्यैरपि विद्वत्सभाललामभूतैः श्रीकालिकाप्रसादशुक्ल विद्याभास्करपण्डितवर्यं श्रीमणिशङ्कर उपाध्यायप्रभृतिभिरनेकैः संस्कृतवाग्भूषणैस्तदनु मण्डलगानरचनाकार्यं स्वस्कन्धेन समोढम्।

एवं गीततालभयबद्धमण्डलगानानि शताधिकानि कानिचित् प्रकाशितानि कान्यपराण्यप्रकाशितान्येवाद्यापि वर्तन्ते। संस्कृतभाषारचितलोकभोग्यसाहित्यस्य लोपो मा भूदिति मनीषया विद्वत्सभासञ्चालकैस्तेभ्यस्तेभ्यः कानिचिद् विशिष्टानि गेयपद्यानि पुनर्मुद्रितानि स्युरित्येतत् तृतीयं प्रकाशनं पदवीमारोपितम्।

अस्मिंस्तृतीयप्रकाशने गीतगोविन्दस्य * श्री बदरीनाथ शास्त्रिणां * श्री विद्याभास्करमणिशङ्करोपाध्यायानां * श्री प्रद्युम्नशास्त्रिणां * श्रीलक्ष्मीशङ्कर शुक्लानां * श्रीजयनारायण पाठक वर्याणां * डॉ. श्री अरुणोदय जानी महाभागानां * एवमाकलय्य ६५ पञ्चषष्टिगीतानि समगृह्यन्त।

सर्वतःसर्वङ्कषे करालेऽर्थसङ्कटे समेषां विदुषां सर्वाणि गानानि साकल्येन प्रकाशयितुं धनजनसाधनहीनेयं विद्वत्सभा न

कल्पत इति चेतसा दुःखमनुभवामः प्रार्थयामश्च क्षमाम् । कृतेऽपि संशोधने कुत्रचिद् रचयितुरभिप्रेतत्वाद्, रचनाप्रवाह-पारवश्याद्, मुद्रणदोषाद् मनुजमतिसहजदोषवशाद्वा, स्खलन-सम्भवे नीरक्षीरन्यायेन स्वारस्यलुब्धाः सहृदयाः स्वयमेव संशोध्य परितोषं वक्ष्यन्ति । वर्षत्रयात् समारब्धमिदं प्रकाशन-कार्यं प्रकाशनमन्त्रिश्री कञ्चनलाल परीख महाभागानां महतः परिश्रमस्यैव फलमिति तेभ्यो धन्यवादान् वितरामः ।

3 A Associate यन्त्रालयसंचालकानां [अस्मत्कृत-विलम्बं सोढ्वाऽपि सोत्साहं प्रकाशितमिदं पुस्तकमित्युपकार-मावेदयामः ।

अन्ततो विद्वत्सभाऽधारस्तम्भयोर्दिवङ्गतयोः पण्डित-पञ्चानन श्री बदरीनाथशास्त्रि विद्याभास्करपण्डितप्रवर श्री मणिशङ्करोपाध्याययोः पादपद्मेषु पुस्तिकामिमां समर्प्यानृण्य-मावहन्तः क्षामं क्षामं विरमामः ।

सं–२०३९ विजयादशमी
१६–१०–१९८३

अध्यक्षः
पण्डित–लक्ष्मीशङ्कर गौरीशङ्कर शुक्ल
संस्कृतविद्वत्सभा, वटपत्तनम

भगवत्प्रसाद प. पण्ड्या
प्रधानमन्त्री

लाभशङ्कर मो. जोशी
सहमन्त्री

सर्वतन्त्रस्वतन्त्र–सुरभारतीसंरक्षणैकनिष्ठसंस्कृतविद्व-त्सभासंस्थापकदिवङ्गतपण्डितपञ्चाननविद्यासुधानिधि-श्रीबदरीनाथशास्त्रि चरणकमलेषु

यल्लेखनीसृतसुधापूरितं वाङ्मयं चिरात् ।
बदरीनाथपदयोर्गेयग्रन्थः समर्प्यते ॥

प्रतिवादिभयङ्करनिगमागममूर्धन्य-
विद्याभास्करदिवङ्गत-
श्री मणिशङ्करोपाध्यायचरणयोः

विद्वत्समाजमुकुटे मणिभां यद्गिरो दधुः ।
मणिशङ्करपादाब्जे ग्रन्थो मधुकरायताम् ।।

श्री हरिः

प्रासङ्गिकम्

(पुरस्कर्ता – प्रद्युम्न ब. शास्त्री साहित्याचार्यः, वेदान्ताचार्यः)

जगति सर्वासु भाषासु सर्वथा संपूर्णा भाषा संस्कृतभाषैव वर्तते" इति, षष्टिवर्षेभ्यः पूर्वं स्वगृहं समागतेन केनचित् साक्षरवर्येण सह वार्तालापप्रसङ्गे श्रीमद्भिः पण्डितपञ्चाननैर्बदरीनाथशास्त्रिवर्यैरभिहितं, तदा तेन प्रत्युक्तम्, नाहं भवदुक्तं स्वीकरोमि। यदि संस्कृतभाषायां सर्वं वर्तते, तर्हि गुर्जरभाषायां गरबापदेन व्यवहार्यमाणं मण्डलगानकाव्यं कथं न दृष्टिपथमवतरति? श्रुत्वेदं शास्त्रिवर्यैर्निगदितम्; अयमहमागच्छामि, क्षणं विरम्यताम्, इदानीमेव 'गरबा' काव्यं दर्शयामि, इत्युक्त्वा प्रकोष्ठान्तरं गत्वा पत्रं लेखिनीञ्च गृहीत्वा तत्क्षणमेव काव्यं विरचय्य विलिख्य त्रिचतुरैः पलैः बहिरागत्य प्रदर्शितं गरबाकाव्यम्–

"तीरं स्मरामि गोविन्द, यामुनं तीरं स्मरामि"

एवम्, अभिनवजयदेव – पण्डितपञ्चाननानां श्रीमतां बदरीनाथ शास्त्रिवर्याणां लेखिन्या गुर्जरधरायां वटपत्तने संस्कृतभाषायां 'गरबा' साहित्यस्य प्रादुर्भावः समभूत्। तदनु वटपत्तने श्री विठ्ठलनाथपाठशालायां श्रीविठ्ठलेशप्रभुचरणानां प्राकट्योत्सवे –

"मम चित्तं सदा स्मरतात्
श्यामधाम कमनीयम्॥

मम जिह्वा सदा वदतात्
तस्य नाम रमणीयम् ॥

इति द्वितीयं मण्डलगानं जनिमलभत । तदनु विद्वत्सभायाः प्रथमवार्षिकोत्सवप्रसङ्गे –

"अय नन्दकुमारं निर्जितमारं"

तदनु चानेकानि मण्डलगानानि गीतानि च शास्त्रिवर्याणां लेखिन्या विलिखितान्यनेकेषां विदुषां श्रोतॄणां, पाठकानामद्यापि हृदयान्यान्दोलयन्ति ।

तथैव विद्वत्सभायाः प्रथमवार्षिकोत्सवप्रसङ्गे प्रतिवादिभयङ्करैः विद्याभास्करैः प्रार्थना स्वागतगीतञ्च सर्वेषां हृदयभावुकं सुचारुशब्दैर्ग्रथितं निर्माय समुपस्थापितम् । तदनु विद्याभास्करैरप्यनेकानि गीतानि मण्डलगानानि भङ्गिगीत (भांगडा गीत) मपि विरचितं श्रोतॄणां दर्शकानाञ्चाद्यापि कुतूहलं जनयत्येव । यदि केनाप्याधुनिको प्राचीनो वा रागः प्रदर्शितः स्यात् तदा सद्य एव तद्रागेण गीयमानं संस्कृतं गीतं एतैः पण्डितपञ्चाननैः तथा विद्याभास्करैः निर्मितं स्यादेव ।

एतेषामेव महानुभावानां पथाऽद्याप्यनेकैःविद्वद्भिः गीतनिर्माणादिना वटपत्तने भगवत्याः सुरसरस्वत्याः सपर्या विधीयते । प्रायः विंशतिवर्षेभ्यश्च नवरात्रोत्सवे वटपत्तने अनेकासु वीथीषु भिन्नभिन्नमार्गेषु च संस्कृतमण्डलगान (गरबा) कार्यक्रमोऽविच्छिन्नप्रणाल्या जनानां हृदयानि आवर्जयति । एवं वटपत्तने संस्कृतभाषायां गीत-'गरबा' साहित्यं प्रादुर्भूतं

विकसितं प्रसृतञ्च सर्वत्र एतेषामेव महानुभावानां प्रयत्नेन समुत्साहेन प्रेरणया च इति न परोक्ष प्रेक्षावतां |विदुषाम् । संस्कृतसाहित्यं सर्वदैव एतैः सुसेवितमुपकृतमित्यहं मन्ये ।

अस्यां गेयपद्यपुस्तिकायां येषां येषां विद्वद्वरेण्यानां महानुभावानां गीतानि-मण्डलगानानि मुद्रितानि सन्ति तेषामपि कतमैः शब्दैः भावैर्वा उपकारभारो वोढव्यः? इयं सभा तेषां ऋणादात्मानं मोचयितुं नेच्छति । इच्छति च सुसमृद्ध-मपि संस्कृतभाषायाः गेयसाहित्यं पुनः सुसमृद्धं भवेदिति ।

अत्रावसरे अस्मिन् पुस्तिकाप्रकाशनावसरे संशोधन-कार्यं स्वीयानेकापरिहार्यकार्यबाहुल्ये सत्यपि व्याकरणाचार्यैः विद्वद्वर्यैः श्रीमद्भिः लक्ष्मीशङ्कर गौ. शुक्ल महोदयैः सम्पा-दितं तदर्थं तेषामपि उपकारस्मरणमुल्लेखनीयं भवति ।

तथा च बहुत्र संस्थासु कार्यभारं वहमानैः मनसा कर्मणा च संस्कृतभाषासेवापरायणान्तःकरणैः श्रीमद्भिः कञ्चनलाल ही. परिखमहोदयैः गेयपद्यपुस्तिकाप्रकाशन-कार्यं संपादितं तदर्थं तेऽपि भूयो भूयः धन्यवादार्हाः सन्ति । अत्र सहकारं दत्तवतां नामानि प्रमादाद् विस्मृतानि स्युः तेभ्यः सर्वेभ्यः धन्यवादाः वितीर्यन्ते । अन्ततश्च पण्डितपञ्चा-ननानामतिप्रियां गेयपद्यपङ्क्तिं स्मरामि –

भारतं सर्वदैव शून्यं भवेद् भाषा तदीया संस्कृतं न चेत् ।

इति शम्

प्रार्थना

वन्दे देवीं शारदाम्
शुभ्रवस्त्रां तां भजामि भजामि

संस्कृत-विदुषां महापर्वणि
मुदा पदं ते श्रयामि श्रयामि

ज्ञानाकरनिमलप्रकाशं
मम हृदयं ते नयामि नयामि

शुभ्रतामरससरसमानसे
निगमशास्त्राणि भान्तु भान्तु

जय जय हे सुवर्णदेवि
मोहतिमिरं कृष्णातु कृष्णातु

प्रद्युम्नशास्त्री

संस्कृतविद्वत्सभा-वटपत्तनम्

सदस्यताप्रकारा: ।

संस्कृतविद्वत्सभाया: सदस्यता

		शुल्कम्
(१)	सम्मानितसदस्यता—	५-०० रूप्यकाणि ।
(२)	संरक्षकसदस्यता—	१०१-०० रूप्यकाणि ।
(३)	पोषकसदस्यता—	१००१-०० रूप्यकाणि ।

॥ श्रीमद्गोपालाष्टपदी ॥

वेदैर्वेद्यमवेद्यं विदितैर्दितिजारातिपरार्तिहरम्
मानसलीनमलीनं संसृतिजाले संसृतिजालहरम् ।
आनंदैककरोरूरः स्थलचरणश्रुतिचक्षुर्भालम्
यमुनातोयविहारं, प्रणमत गोपालं जगतीपालम् ॥१॥

रञ्जितमञ्जुलकञ्जसहोदरपदयुगलेन समारूढम्
कल्पद्रुमडम्बरहरहरचारुकदम्बं शाखाशतगूढम् ।
तोयनिमग्नविलासवतीजनपटमिषमानसलुण्टाकम्
मन्दस्मितविद्योतं प्रणमत गोपालं जगतीपालम् ॥२॥

प्राकृतधिक्कृतिमात्रफलाकृतिहीनमशेषाकृतिलोलम्
सत्कृतिशीलनरेक्षितरम्यकिशोराकृतिमद्भुतलीलम् ।
यद्विकृतिर्न कदापि समस्तजगत्प्रकृतेः प्रकृतिं विकृतिम्
दुष्कृतकोटिविमथनं प्रणमत गोपालं जगतीपालम् ॥३॥

निजमखहानिक्षुब्धमहेन्द्रप्रहितासारतडिन्निनदै-
र्भीताभीरभयक्षपणायोत्क्षिप्तभुजोद्धृतभूमिधरम् ।
सव्येतरकरकररुहचन्दिरकरनिकराञ्चितकाञ्चीकम्
गोवर्धनधरसंज्ञं प्रणमत गोपालं जगतीपालम् ॥४॥

पार्थरथावस्थितिमिषमथिताज्ञानं ज्ञप्तिवपुषमीशम्
कौरवचीत्कृतिरावादेशपराचार्यं परमाचार्यम् ।
कुन्तानन्दनसान्द्रानन्दसरित्पतिमिन्दुशताभासम्
निजभाभासितभुवनं प्रणमत गोपालं जगतीपालम् ॥५॥

अंशोऽयं मम जीवो जगति प्रकृतिर्मेऽस्त्यपरा जगती
जन्मजरामरणानि शरीरे न च जीवे चितिमात्ररसे ।
मच्चित्तो भव मद्भक्तो भव मत्कृतिमात्रपरोऽपि त्वम्
वाक्यशतानि वदन्तं प्रणमत गोपालं बहुवाचालम् ॥६॥

यमुनातीरकदम्बतलस्थं श्रीराधाहृदयाधारम्
त्रिभङ्गललिताकृतिमतिमधुरं सजलजलदरुचिरोचिष्णुम् ।
निजमुरलीमधुमधुरारावविमोहितगोपीशतवीतम्
सन्ततरसमतिरसिकं प्रणमत गोपालं जगतीपालम् ॥७॥

प्रांशूपांशुत्वादिविशिष्टे दिष्टविधौ विमुखस्य सदा
मिथ्यावादविलासकथास्वनुरक्तधियो मम हृन्मधुपम् ।
स्वीय पदकमले कर्षन्तं हर्षोत्कर्षसुवर्षणदम्
दीनोद्धरणविचतुरं प्रणमत गोपालं जगतीपालम् ॥८॥

न्यायमीमांसासाहित्यादिसकलशास्त्रविदः

श्रीबदरीनाथशास्त्रिणः

१

मङ्गलपद्यानि

जय जय जय गोपीजनवल्लभ कुवलयदलसुन्दरनयनद्वय
भक्तहृदयसरसीरुहभृङ्ग हरे मुरारे०
मङ्गलमय जय जगतो मङ्गलमुल्लासय जय करुणामय जय
आभीरीसाचिस्मितलुब्ध हरे मुरारे०
कनकाचलपरमाणुगुणितगुण दोषोज्झित भुवनत्रयभूषण
मन्मानससारसकुलहंस हरे मुरारे०
नन्दयशोदासदनसुधाकर सत्कृतिसंहृतकृतिपरमादर
इन्दुशतांशुविनिर्मितरूप हरे मुरारे०
उदयाचलमुपगतवति मिहिरे तिरोभावमुपयाते तिमिरे
चेतनमखिले प्रेरय जगति हरे मुरारे० ॥ १ ॥

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

२

जयति निखिलविबुधवृन्दवन्द्यविबुधभारती ॥...ध्रुवम् ॥
साङ्ख्ययोगमुखरशास्त्रसद्विचारचातुरी ।
काव्यनाट्यनिचितदिव्यरसविलासमाधुरी ।
दुरितदहनरामचरितविमलसुरतरङ्गिणी ।
रसिकहृदयकुमुदचन्द्रकृष्णगानसङ्गिनी ।
नीतिविदुरविष्णुगुप्तकाव्यविदुरसेविता ।
कालिदासबाणदण्डिमुखकवीन्द्रदेविता ।

रामकृष्णधर्मवृषलहर्षभोजवन्दिता ।
वेदवेद्यपरमतत्त्वनृत्यदनुभवाञ्चिता ॥ जयति० ॥

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

३

मातः! शारदे! वन्दे ते दिव्यं पादयुगम् ।
शरदम्बुजस्थे ! वन्देऽहं ते पादयुगम् । ॥१॥
तव दयया विगलितगतिगीरपि निगमागमहृदयं जडधीरपि ।
मातर्विन्दते वन्दित्वा दिव्यं पादयुगम् ॥ मातः शारदे० ॥२॥
विधिहरिहरसुरसेवितशरणे ! पतितोऽहं तव वरदे ! चरणे !
बाले मय्यनुग्रहशीले पातय दृष्टियुगम् ॥ मातः शारदे० ॥३॥
लोके दशसु दिशासु विचित्रे घोरं तिमिरमजस्रं नेत्रे ।
प्रायः पश्यतो मे मातः पालय पाणियुगम् ॥ मातः शारदे० ॥४

विद्याभास्कराः पं. म. व. उपाध्यायाः

४

शारदे पालय पालय माम् ।
शारदे मञ्जु विलोकय माम् ।
गाढतमस्ततिसागरमग्नं, विश्वमिदं निखिलम् ।
निर्जरसामीशः कोऽन्यस्त्वद् बहिरानेतुमलम्...शारदे०
त्वत्कृपया मूढा अपि लोके वागधिपा अभवन् ।
संसृतिसिन्धोर्मुमुक्षवो ये त्वां वद के नौशन्...शारदे०

समस्तविश्वं तव-प्रकाशं लब्ध्वा याति हि परं प्रकाशम् ।
सा त्वं दर्शयसे परतत्त्वम् ....शारदे०

वस्से तुहिनोपमवस्त्रं शमयसि मानसशमलम्
श्वेताम्बुजमाला कण्ठे ते ....शारदे०

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

५

वन्दे पादयुगं ते मातः शारदे रे पाहि
हे विज्ञजनाः सौरी सा वन्दनीया भाषा
दिव्यास्तस्याः भेदास्ताः कीर्तनीया भूषा
हे गदितुं योग्या सौरी वाणी, पूर्णा सा हि लोके
वन्दे पादयुगं ते--

हे वेदे तस्या भव्यं यच्चिन्तनीयं रूपम्
ध्येयं सर्वैर्नित्यं तद्रक्षणीयं नूनम्
हे भुवने सर्वैर्वाच्या सेयं रम्या सा हि लोके
वन्दे पादयुगं ते--

हे शास्त्रे गूढा सौरी या मर्षणीया भाषा
चित्ते धार्या प्राज्ञैः सा सेवनीयाऽदोषा
हे वदने स्थाप्या दिव्या भाषा पूज्या सा हि लोके
वन्दे पादयुगं ते--

हे काव्ये मिष्टा भाषा सा प्रेक्षणीया नित्यम्
पेया सौधी वाणी याऽऽस्वादनीया सत्यम्
हे सततं गेया श्रेष्ठा ब्राह्मी काम्या सा हि लोके
वन्दे पादयुगं ते--

हे हेया नैवाऽस्माभिर्गीर्वाणवाणी मेया
सैषा विश्वद्वारे प्रचारणीयाऽध्येया
हे जगति कृत्स्ने सौरी भाषा पोष्या सा हि लोके
वन्दे पादयुगं ते--

साहित्य-वेदान्ताचार्याः प्रद्युम्न व. शुक्लाः

स्वागतगीतानि

६

संस्कृतभाषारसमुद्वहतामुदारनीतिमतां
वदामः स्वागतमिह भवताम् ।
अमरभारती सेयं मधुरा क्रान्तिः प्रभवति यत्र न चतुरा ।
रुचिरा सुचिरा सुखस्य सेव्या सदैव या महताम् ।। वदामः०
अतीन्द्रियं पश्यन्ति य ऋषयः इयञ्च तेषामपि वाग्विषयः ।
कमलाशमलं सेयं शमयत्यपारभूतिमताम् ।। वदामः०
संस्कृतविद्वत्सभा सुमहती धनजनसाधनसहिता वहति ।
कुरुते प्रणतिं विनयावनता समयज्ञानवताम् ।। वदामः०

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

७

सुरभाषेयं वरभाषेयं भवतादभीष्टदायिनी
भवतामिह तुष्टा भावनया
बहुविधविषमदशास्वपि धीरैरियमतिमानमुपेता
राजति जयति गुणैराभरणैरनुपमतामुपनीता
ऋषिभाषेयं मुनिभाषेयं भवतादनिष्टदाहिनी
भवतामिह तुष्टा भावनया....सुर०
परदेशेष्वपि पुण्यतमेयं गुरुपदवीमधिरूढा
केवलकामधनार्थिभिरेषा हन्त सुदूरमपोढा
बुधभाषेयं जिनभाषेयं भजतां जयप्रदायिनी
भवतामिह तुष्टा भावनया....सुर०
निजमनसा तस्या बहुमाने य इह बुधाः समवेता
वदत सुराः किमु वा ते मुनयः किमु ऋषयोऽतीताः
शुभमागमनं शुभसंगमनं तनुयाद् यशोविधायिनी
भवतामिह तुष्टा भावनया....सुर०

विद्याभास्कराः प. म. व. उपाध्यायाः

मण्डलगानानि

८

मम चित्तं सदा स्मरतात् श्यामधाम कमनीयम् ।
मम जिह्वा सदा वदतात् कृष्णनाम रमणीयम् ।

गुञ्जन्मधुव्रतमालया विशालया
वीतकण्ठं मनस्युदियात् श्यामधाम कमनीयम्....मम चित्तं
दानैरलं वा वितानैरलं मे
मम कर्णान्तिकं समियात् कृष्णनाम रमणीयम् ।
श्रावं श्रावं गोपनारीव्रजोऽसौ
उन्मादं परं प्रायात् कृष्णनाम रमणीयम्....मम चित्तं

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

९

तीरं स्मरामि गोविन्द यामुनं तीरं स्मरामि ।
गोपाङ्गनानां स्मेरमानसानाम् (२)
मन्दहासभासि गोविन्द, यामुनं तीरं स्मरामि ।
शारदेन्दुचन्द्रिकाविकासिनीरसैकतम् (२)
गीतैर्निनादि गोविन्द, यामुनं तीरं स्मरामि ।
वेणुनादमोहितामरीविमानसंकुलम् (२)
दिव्यदीप्तिशालि गोविन्द, यामुनं तीरं स्मरामि ।

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

१०

नाथ हरे जय नाथ हरे सीदति राधा वासगृहे
पश्यति दिशि दिशि रहसि भवन्तं त्वदधरमधुरमधूनि पिबन्तम्

त्वदभिसरणरभसेन वलन्ती पतति पदानि कियन्ति चलन्ती ।

नाथ हरे ०

विहितविशदबिसकिसलयवलया, जीवति परमिह तव रतिकलया ।
मुहुरवलोकितमण्डनलीला, मधुरिपुरहमिति भावनशीला ।
त्वरितमुपैति न कथमभिसारं, हरिरिति वदति सखीमनुवारम् ।
श्लिष्यति चुम्बति जलधरकल्पम्, हरिरुपगत इति तिमिरमनल्पम् ।

नाथ हरे ०

भवति विलम्बिनि विगलितलज्जा, विलपति रोदिति वासकसज्जा ।
श्रीजयदेवकवेरिदमुदितं, रसिकजनं तनुतामतिमुदितम् ।

—गीतगोविन्दकाव्यम

११

(कंकुखयुं ने सूरज ऊग्योरे...)

देवि तव प्रभा भासते मानवलोके ।

मानसभूमौ देवी सुर-भारती दीव्यतु ।
देवैः श्रितं हि तेऽत्र रूपं नृत्यतु ।
प्रभा भासते मानवलोके, देवि तव ० ।।
भारतलोके सौरी राष्ट्र-भारती राजतु ।
लोकैः सदैव सेव्यमाना तेजतु ।
प्रभा भासते मानवलोके, देवि तव ० ।।
पावनवाणी रूपं तेऽपि शारदे गङ्गति ।

८

भाषाविवादजातयुद्धं शाम्यति ।
प्रभा भासते मानवलोके, देवि तव ० ॥

साहित्य - वेदान्ताचार्याः प्रद्युम्न ब. शुक्लाः

१२

छाया–अनुवादः

(श्यामरंग समीपे न जावुं ०)

श्यामवर्णसमीपे न यामि, सखि नैव यामि ।
श्यामवर्णसमीपे न यामि ।
श्यामेन रञ्जितं समानमेव सर्वकम् ।
कापटयमेवं विभावयामि, सखि० ।
कस्तूरिकां नैव धारयामि भाले ।
अञ्जनं न नेत्रयोः कदापि, सखि ० ।
कोकिलस्य कूजनं शृणोमि नैव बाले
मङ्गले न वायसस्य वाणीं, सखि ० ॥
नीलाम्बरं श्यामकञ्चुकीं न धारये ।
कालिन्दीजले न स्नामि बाले, सखि ० ।
मरकतमणिं न पश्यामि मेघं ।
जम्बूवृन्ताकं न भक्षयामि, सखि ० ॥
दयायाः प्रियतमेन प्रतिज्ञा कृता ।
किन्तु मनो वदति न मानयामि, सखि ०

साहित्य - वेदान्ताचार्याः श्रीप्रद्युम्न ब. शुक्लाः

१३

स्वागतगीतम्

(गीति :--यशोमती मैय्यासे बोले नन्दलाला ०)

यशोवतां स्वागतं वयं भावयामः
श्रेष्ठां हि सौरीं सदा संवदामः
अये स्पृहणीयशीलाः सततं सभेयं
द्वारे वितनोति सदा स्वागतं सुगेयं
मानवाः भजामो वयं हो--
मानवाः भजामो वयं मुनिप्रणीतभाषां--सदा
क्षणे विदुषां सभायां भवतां समेषां
क्षणं समुपागतानां स्वागतं वदामः
साधनैर्विहीना सभा हो-हो-हो--
साधनैर्विहीना सभा हृदा भजति युष्मान्--सदा

साहित्य-वेदान्ताचार्याः प्रद्युम्न ब. शुक्लाः

१४

त्वं मया वारितोऽसि

(गति : में तने वारियोरे मारा पोपटडा.)

त्वं मया वारितोऽसि पूर्वमेव कीर
ब्राह्मणस्य वीथीं प्रयाहि नैव कीर
वाचैव शूरः स सदैव कीर
ताडयेत्स टिप्पणैश्च मोदकैश्च कीर ॥ त्वं मया० ॥

१०

वीथीं न देशसेवकस्य याहि कीर
भाषणे विचक्षणो भवेत्सदःसु कीर
ताडयेत्प्रशंसया स्वपक्षस्य कीर ।। त्वं मया० ।।
वीथीं वणिग्जनस्य मा याहि कीर
तण्डुलान्तिलैः संमेलयेत्स कीर
ताडयेत्स चक्रवृद्धिव्याजेन कीर ।। त्वं मया० ।।
ज्योतिर्विदां मा गाः सदःसु कीर
आश्विनञ्च कार्तिकञ्च निर्णयन्ति कीर
वादैर्वितण्डया च ताडयन्ति कीर ।। त्वं मया० ।।

पण्डितपञ्चाननाः श्रीवदरीनाथ शास्त्रिणः

१५

वन्दन्ते यामखिलसुमनसो

(गतिः साची रे मारी)

वन्दन्ते यामखिलसुपनसो नियमितमनसो
भवतु शिवा सा शान्तिदा मे ।।१।।
सेवन्ते यां करधृतवलयो विधिहरिहरयो
शमयतु दुरितान्यम्बिका मे ।।२।।
नवरात्रे ये सुखमयदिवसा विकसितमनसा
तत्र तवार्चां कामयेऽहम् ।।३।।
तव मनुभिर्यवतिलयुतगव्यं पायसहव्यं
हुतभुजि होतुं कामयेऽहम् ।।४।।

नववसनैश्चन्दनसुमधूपैर्द्योतितदीपैर्
जननि तवार्चां कामयेऽहम् ॥५॥
नैवेद्यं मधुधृतदधिसहितं मोदकमहितम्
शैलसुते संभावयऽहम् ॥६॥
विप्राणामशनं प्रतिदिवसं स्वादु च सरसम्
दातुमपीहे प्रीतयेऽहम् ॥७॥
मातः कुरु बहुकनकनिधानं यान्त्रिकयानम्
मम दशभूमितलं गेहम् ॥८॥
नित्यं तण्डुलगोधूमानां धृततैलानां
वर्षाकुलमाधेहि गेहम् ॥९॥

पण्डितपञ्चाननाः श्री बदरीनाथ शास्त्रिणः

१६

गीतम्

श्रय नन्दकुमारं निर्जितमारं सारं दिव्यगिराम् ।
भवसागरपारं कम्रविहारं पूरं नव्यमुदाम् ॥
क्लेशाविलभूभरमपनेतुं जातो यदुवंशे
कारागारे मध्यनिशायां पूर्णगुणं भगवं....तं....श्रय०
पाययितुं हालाहलमेनं रक्षः स्तन्यमिषात्
आगतमेनज्जननीगतये अनुमेने भगवं....तं....श्रय०
गर्वोन्मत्ताखिलसुरनायकयज्ञं खण्डितवान्
प्रलयाम्बुवहे वर्षति गिरिमपि दध्रे लघु भगवं....तं....श्र०

शारदपूर्णशशाङ्ककराञ्चित–कालिन्दीकूले
रेमे रमयन् गोपीनिकरं भावमयो भगवं....तं....श्रय०
कंसादिकजनदमनेनावनिभरमप्यत्ययन्
धर्मं ग्लानं पुनरपि गमयन् स्थानं श्री भगवं....तं....श्रय०

पण्डितपञ्चाननाः श्री बदरीनाथ शास्त्रिणः

१७

भारतीवृत्तम्

प्रबुद्धा भारती रे, प्रयाता मारुतीमाशाम् ।
सुरेशा लेभिरे रे, स्वकीयामीहितामाशाम् ।।
विधाता वेदानज्ञासीद्, अवादीदेतानिन्द्रादीन् ।।
तयापुः पावनीं रे, सुधामन्यैरसंप्राशाम्....प्रबुद्धा०

ततः सा याता पातालं, चकाराहीन्द्रं वाचालम् ।
रसज्ञा राशिभी रे, रमामाराधयत्सेशाम् ।।
प्रबुद्धा भारती रे, प्रयाता भोगिनामाशाम् ।
भुजङ्गा लेभिरे रे, स्वकीयामीहितामाशाम् ।।
ततः सा प्राप्ता भूलोकं, चकाराशेषं निःशोकम् ।
कवीनामन्तरङ्गे, चकाशे चन्द्रसंकाशा ।।
प्रबुद्धा भारती रे, प्रयाता मानवीमाशाम् ।
कवीन्द्रा लेभिरे रे, स्वकीयामीहितामाशाम् ।।
स्वयंभूसंकेतेनादौ, स्तुतौ श्री सीतापतिपादौ ।
प्रसिद्धि प्रापिता रे, पृथापुत्रा अगम्याशाम्....प्रबुद्धा०

रसेशो रासेशो रासे, सखीभीं रेमे विश्वासे ।
रतिं सा सन्ततां रे, जगौ सम्मुग्धराकेशाम्....प्रबुद्धा०
कविश्री–कालिदासे वा कवौ श्रीहर्षे भासे वा ।
विलासान्दर्शयन्तीं, नमामो देवानां भाषाम् ॥
प्रबुद्धा भारती रे.

विद्याभास्करा: प. म. व. उपाध्याया:

१८

सर्वदैव गोपालबाल

सर्वदैव गोपालबाल भावये रूपं त्वदीयम्०
प्रावृषेण्यवारिदालिनीलकान्ति गेहम्
चन्दनावदातरम्यभाल.....भावये रूपम्०
काञ्चनप्रणीततन्तुपीतवाससाञ्चितम्
कण्ठशोभिगुञ्जालिमाल.....भावये रूपम्०
वारिजावलेपमोचनप्रवीणलोचनम्
लोकविततपुण्यकीर्तिजाल.....भावये रूपम्०
दीनहीनभक्त–प्रतिपाल....भावये रूपम्०
पद्मविहारसद्म भक्तनेत्रचन्दिरम्
भाविभासिताशालवाल....भावये रूपम्०

पण्डितपञ्चानना: श्री बदरीनाथ शास्त्रिण:

१९

पश्य शारदी

पश्य शारदी विभाति दिव्ययामिनी मानसं ममोन्मनाय
यथा तारुण्यपूर्णगुण्यकामिनी मानसं ममोन्मनायते ॥
सुरभिगन्धमेष मारुतो विसारयन्
वाति लतिकाशिरांसि चारु चालयन्,
भाति चन्द्रिकाभिरञ्जिता वनावली, मानसं ममोन्मनाय
पश्य शारदी० ॥१

पश्य पादपव्रजोऽतिकुसुमभारवान्,
किरति नो सिताभ्रपटलमम्बुसीकरान्,
स्रवति नेदं नभो किन्नु माधुरीम्, मानसं ममोन्मनायते
पश्य शारदी० ॥

अद्य ' विद्वत्सभा ' भासिताऽधिकम्,
विबुधसभ्यैर्भवद्भिरर्चिताऽधिकम्
जयतु भारती प्रशान्तपुण्यभावती, मानसं ममोन्मनायते ।
पश्य शारदी० ॥३

पण्डितपञ्चाननाः श्री बदरीनाथ शास्त्रिणः

२०

यात भो युवानः

यात भो युवानः संगरावनिं बद्धशस्त्रश्रमं
मा मन्वतां भयम्
दस्यवो यदा यान्ति भारतम्
दस्यवो लुलुण्ठिषन्ति भारतम्
खड्गिनोऽथ चर्मिणो निषङ्गिणो वा
दीर्घनालिकाधरा धन्विनोऽग्रेसरा
मातरं स्वकीयां रक्षितुम्
एतदस्तु वो व्रतम्....दस्यवो०
स्मर्यतां प्रतापः समुद्भटो वा
मेदपाटेश्वरो युद्धवाटेचरः
कं किं तपस्तेन नादृतम्
(जन्म) भूमिरक्षापरो....दस्यवो०
शूरः शिवाजी चिन्त्यतां योऽ–
वरङ्गजीवं क्रुधा दृप्तमन्तर्मुधाऽ–
पीपठत्स गेहेनर्दिताम्
दैन्यमुद्धूयताम् ....दस्यवो०
गान्धी महात्मा जवाहरोऽसौ
वल्लभः स्मर्यताम्

शूरता धार्यताम्
वीरः स शास्त्री विभाव्यताम्
भारतं रक्ष्यताम् ....दस्यवो०
धैर्यं समालम्ब्य मानसाद् वो
क्लीबता त्यज्यताम्
पौरुषं व्यज्यताम्
स्वाधीनतादीप्तपावके
स्वं स्वेन हूयताम् ....दस्यवो०
चीनाश्च हूणाः पुल्कसा वा
सीमभङ्गोद्यता
नीतिसङ्गोज्झिताः
कालभूमिरेषां भारतम्
एकतामागतम् ....दस्यवो०
वीरा महाराष्ट्रदेशोद्भवाः
शिक्खजात्युत्थिता
राजपुत्रास्तथा
गुर्जराश्च वाङ्गाश्च मद्रका
नूनमैक्यं गता ....दस्यवो०

पण्डितपञ्चाननाः श्री बदरीनाथ शा[illegible]

२१

श्रितकमलाकुचमण्डल ।

श्रितकमलाकुचमण्डल धृतकुण्डल ए ।
कलितललितवनमाल जय जय देव हरे ॥१॥
दिनमणिमण्डलमण्डन भवखण्डन ए ।

मुनिजनमानसहंस जय जय देव हरे ॥२॥
कालियविषधरगञ्जन जनरञ्जन ए ।
यदुकुलनलिनदिनेश जय जय देव हरे ॥३॥

मधुमुरनरकविनाशन गरुडासन ए ।
सुरकुलकेलिनिदान जय जय देव हरे ॥४॥
अमलकमलदललोचन भवमोचन ए ।
त्रिभुवनभवननिधान जय जय देव हरे ॥५॥

जनकसुताकृतभूषण जितदूषण ए ।
समरशमितदशकण्ठ जय जय देव हरे ॥६॥
अभिनवजलधरसुन्दर धृतमन्दर ए ।
श्रीमुखचन्द्रचकोर जय जय देव हरे ॥७॥

तव चरणे प्रणता वयमिति भावय ए ।
कुरु कुशलं प्रणतेषु जय जय देव हरे ॥८॥

श्रीजयदेवकवेरिदं कुरुते मुदमे ।
मङ्गलमुज्ज्वलगीतं जय जय देव हरे ॥९॥

गीतगोविंदकाव्यम् ।

२२

भावो भृशमेधते ।

भावो भृशमेधते (२) मम पुम्भावे ब्रह्मणि सुन्दरे
मुग्धमनोहरवक्त्ररुचिररुचिसरिति मनो मे स्नाति
यत्कलयेन्दूरचित इवाब्जे मनागुपमा नहि माति । भावो०

संविन्न रुचये नापि च साङ्ख्यं योगो नैव सुखाय
एकीभावं दुःखं मन्ये नाथ तवास्मि चिराय । भावो०

चित्रचमत्कृतिपूर्णपदावलिकुसुमैरर्चनमीहते
कविनिवहस्ते नान्तङ्गच्छत्यमितगुणावलिजलधे । भावो०

पण्डितपञ्चाननाः श्री बदरीनाथ शास्त्रिणः

२३

रक्षणे समुद्यता सदैव ।

(गतिरियमेव)

रक्षणे समुद्यता सदैव या दिवौकसाम् ।
तत्त्वतो न जानन्ति योगिनोऽपि याम् ।
चण्डिका पातु पातु माम् ।
अम्बिका सा पृणातु माम् ॥१॥

अर्धे निवेशिताऽङ्गके स्वके स्मरारिणा ।
त्यक्तुं समीहते न शङ्करोऽपि याम् ।

अम्बिका पातु पातु माम् ।
चण्डिका पातु पातु माम् ॥२॥

सर्वदा नमः प्रकामवन्द्यकाममातरम् ।
दानवारिवक्षसि प्रकल्पितालयाम् ॥

चण्डिका पातु पातु माम् ।
अम्बिका पातु पातु माम् ॥३॥

बिन्दुत्रिकोणषट्कोणवृत्तसंयुते
गोपुरे समर्चयन्ति भावुका रमाम् ॥

अम्बिका पातु पातु माम् ।
चण्डिका पातु पातु माम् ॥४॥

अर्बुदाचले या कृतालयाऽत्र ।
गुर्जरेषु स्वीकरोत्यनुग्रहेण भक्तार्चनाम् ॥

चण्डिका पातु पातु माम्।
अम्बिका पातु पातु माम् ॥५॥

पण्डितपञ्चाननाः श्री बदरीनाथ शास्त्रिणः

२४

मण्डलगानम् ।

भारतं सर्वदैव शून्यं भवेत्
भाषा तदीया संस्कृतं न चेत्
धर्मेण हीनं विलीनसंस्कृतिप्रभं
पाशवीं विगर्हितां वृत्ति श्रयेत्
भाषा तदीया०

मन्दाकिनीनीरनिर्मला परस्परं
भावना शिवा नामशेषतां व्रजेत्
भाषा तदीया०

शोषश्च पोषोऽचारुचारुकर्मणां
विपर्ययादनेकसम्भिदाभृतां भवेत्
भाषा तदीया०

पर्वशर्वरीकरप्रभेव मोददायिनी
भारतीयसभ्यता तिरोहिता भवेत्
भाषा तदीया०

पद्मनाभवाणी समग्रविश्वशांतिदा
गाता न केनाप्यधीता भवेत्
भाषा तदीया०

हिंसकत्वमेव संततं श्रितो जनोऽयम्
व्याघ्रतां भुजङ्गताञ्च कीशतां व्रजेत्
भाषा तदीया०

वेशे विचारे वर्तने कृतौ वा
पश्चिमानुयायिनां कदापि न त्यजेत् । भाषा०

पण्डितपञ्चानना. श्री बदरीनाथ शास्त्रिण: ।

२५

मण्डलगानम् ।

(गति – हो राज़ रे, बावडीनां पाणी भरवा ग्यातां०)
हो बाल रे, दारुणे संसारे करुणाधारो
गुरुरेको व्योमविहारी

ननु वन्दनीयो रङ्गो ॥१॥
हो बाल रे, क्लेशा: शेषा यान्ति दूरे दोषा,
उदयन्ते दिव्या: कोशा:
ननु कीर्तनीयो रङ्गो ॥२॥

हो बाल रे, येऽन्तराया योगे बहु बाधन्ते
द्रुतमेते नाशमयन्ते,
तदुपासनीयो रङ्गो ॥३॥

हो बाल रे, प्रमाण-धीरेकाथ सिद्धि यायाद्,
अपरा सा लोपं प्रेयाद्,
इति पूजनीयो रङ्गो ॥४॥

हो बाल रे, केवले स्वे रूपे समवस्थाता,
भव-हानोपायं याता,
परिपूजनीयो रङ्गो ॥५॥

हो बाल रे, भारती-पूजायां प्रणयाधायी,
गुरु-वर्याणामनुयायी,
ननु वीक्षणीयो रङ्गो ॥६॥
हो बाल रे, भारतप्रियदेशो देशिकवर्यो,
गुरुदत्ते दत्त-सपर्यो,

ननु सेवनीयो रङ्गो ॥७॥
गुरुराज रे, मणावणीयस्येका दृक् करणीया,
भवभक्तिस्तस्मिन् धेया,
परमातुरे दुःसंगे ॥८॥ हो बाल रे०

विद्याभास्कराः पं. म. व. उपाध्यायाः ।

२६

मण्डलगानम् ।

जय हें सरस्वति शारदे भवपारदे वरदे ।
अव नो मतीश्वरि पादपद्मं वन्दामहे ते ।। ध्रुवम् ।।

भासबाणभवभूतिभी रम्ये हृदि निहिते ।
ऋषिभिर्मुनिभिर्योगिभिर्ध्याता स्वके स्वान्ते ।।जय०।।१।।
देशे निज देशे परे भूमण्डले पूर्णे ।
आबालवृद्धमुपासका राजन्त्यनेके ते ।।जय०।।२।।

बालवृद्धभेदं कदा न हि मानसे मनुषे ।
रात्रिन्दिवं समुपासकानामीप्सितं धत्से ।।जय० ।।३।।

जाड्यं जहि प्रेम्णा प्रदेहि नु सूनृतां वाचम् ।
स्वाभीष्टदा विद्याप्रदा भव शम्प्रदा नित्यम् ।।जय०।।४।।

डॉ. जयनारायण पाठकाः ।

२७

मण्डलगानम् ।

(गतिः–मम चित्तं सदा स्मरतात्)

सदा ब्रह्मेश्वरं स्मरतात् तस्य नाम मननीयम् ।
मुदा विश्वेश्वरं वन्दताम् तस्य धाम रमणीयम् ।।ध्रुवम्।।

एकदन्तकार्तिकेयवृषभपार्वतीयुतम् ।
व्याघ्रचर्माम्बरं नमतात् तस्य नाम० सदा ॥१॥

सिद्धिबुद्धिशर्मवर्मभुक्तिमुक्तिसम्प्रदम् ।
भक्तपीडाहरं भजतात् तस्य नाम० सदा० ॥२॥

ईश: स्वयं सुहृत्सुतौ धनेशविघ्नपौ ।
किन्तु भिक्षाटनं सन्ततम् तस्य नाम० सदा० ॥३॥

बौद्ध आह बुद्ध इति वैष्णवश्च विष्णुरिति ।
तं च नैकरूपधं सेवताम् तस्य नाम० सदा० ॥४॥

सिद्धकिन्नरामरासुरारिसंस्तुतं हृदा ।
भक्तरक्षापरं जपतात् तस्य नाम० सदा० ॥५॥

डॉ. जयनारायण पाठकाः ।

२८

गीतम् ।

(गति–बरसातमें हमसे मिले)

शिव साम्ब हे ।
शिव साम्ब हे महेश नीलकण्ठ भर्ग रुद्र
शर्व शूलिन् शिव साम्ब हे ॥ ध्रुवम्॥

२८

गीतम्

(गति :- बरसातमें हमसे मिले)

शिव साम्ब हे ।
शिव साम्ब हे महेश नीलकण्ठ भर्ग रुद्र शर्व शूलिन्
शिव साम्ब हे ।। ध्रुवम् ।।

विघ्ननाशकः सुधीः सदा सुवन्दते - सदा सुवन्दते ।
विश्वपालनी शिवा मुदातिसेवते - मुदातिसेवते ।
भक्तितत्परा हृदा जना उपासते - जना उपासते । शिव० ।१।

शीतलः शशाङ्क एष मूर्ध्नि भासते - मूर्ध्नि भासते ।
सर्पभूषणं शुभं गले विराजते - गले विराजते ।
भूतिभूषितं कलेवरं प्रकाशते - वरं प्रकाशते । शिव० ।२।

योगिभिः समाधितत्परो विचिन्त्यसे - परो विचिन्त्यसे ।
दीनदुःखहारकः परैर्विमृश्यसे - परैर्विमृश्यसे ।
कीदृगादिदेव हे मया क्व दृश्यसे-मया क्व दृश्यसे ।शिव०।३।

भक्तवृन्दवन्द्यपादवन्दनार्तिहा - वन्दनार्तिहा ।
ध्यानमग्नमानुषैः समर्चितो हृदा—समर्चितो हृदा ।
विश्वशान्तितत्परो भव प्रभो सदा- भव प्रभो सदा ।शिव०।४।

आपदादिसंवृते कलौ युगे विभो -कलौ युगे विभो ।
का गतिर्भवेन्मम त्वया विना प्रभो-त्वया विना प्रभो ।
त्वत्पदाम्बुजे रतिः स्थिरा भवेदहो-स्थिरा भवेदहो ।शिव०।५।

डॉ. जयनारायण पाठकाः

२९

वाणीवन्दनम्

(हरि हरि नाम ले तूं मन मेरो = इति देशकार रागेण गीयते)

भगवति वाणि पादं नमामि ।
पादं तव सुमतिदे प्रणमामि ।। भगवति ।।
देवदानवगणैरपि विनतम् (२) ।
शिशुजनबोधकरं नमामि ।। १ ।। भगवति। ।।
ज्ञानविज्ञानसारसुविमलम् ।
कविगणतोषकरं नमामि ।। २ ।। भगवति ।।
वेदवेदान्तमर्मवितरणम् ।
मुनिजनमोदकरं नमामि ।। ३ ।। भगवति ।।

डॉ. अरुणोदय न. जानी

३०

सुरभारतीस्तवः

(रा़खनां रमकडां – इति रागेण गीयते)

जयतात् सुरभारती (२) इह सततं (२)
विजयमवाप्नुयात् ।।
मृत्युतुल्यसुप्तावस्थातो नितरां मुक्ता जयतात् । जयतात्
अस्मिन्नखिले भूमिवलये इतरा भाषा (२) या ह्यतिशेते
आत्मप्रभावैर्गौरवरूपं पदं चाग्रिमं भजते या ।।१।जयतात्

सत्यवतीसुतवाल्मीकिभ्यां महिमा यस्याः (२) गीतः ।
कालिदासभवभूतिभारविप्रमुखैः पूजितपादा या ॥२॥
जयतात् ।
ब्रह्माऽनेकमुखोऽनन्तो वा गातुं नहि (यं) (२) पारयते ।
तस्या अस्या महिमानं किं गायाम्यर्भकमात्रोऽहम् ॥ ३ ॥
जयतात् ।

डॉ. अरुणोदय न. जानी

२१

अभ्यर्थना

(धनवान जीवन माणे छे – इति रागेण गीयते)

जय कालिके करुणैकनिधे ।
जगदम्बिके सदये रसिके ॥ जय०
सकलैरसुरैरर्चितचरणे देवैरपि वन्दितपादयुगे ।
निजभक्तजनाभयदे वरदे कुरु वासमहो मम हृदयतटे ॥१॥

यः कोऽपि च ते चरणे पतति भवसागरमखिलं सन्तरति ।
तव महिमानं गायामि कथं शेषोऽपि न गेयान्निःशेषम् ॥ २ ॥

वितरात्मकटाक्षलवं मसृणं कुरु बालमिमं ते धन्यतमम् ।
गमनागमनं हर मे जननि हरगेहिनि हे हिमगिरिनन्दिनि ॥३॥

डॉ. अरुणोदय न. जानी

३२

गुरुस्तुतिः

(चन्दनसा वदन – इति रागेण गीयते)

गुरुरेव विधिर्गुरुरेव हरिर्गुरुरेव हरो भवसंहारो ।
गुरुरेव नृदेहधरं ब्रह्म गुरुमेव परं शिरसाऽस्मि नतो ।। गुरु

गुरुणा करुणा विहिता परमा
न हि तेन समो भवपारकरो ।।
योगेन विना तपसा च विना
कृपया परया जनसौख्यकरो ।।

गुरवे विलसन्तु सदा नतयो
न ऋते हि गुरोः स्यादुद्धारो ।। गुरु० ।।

सुगुरोश्चरणं भवसन्तरणं
सुगुरोः श्रयणं भवदुःखहरम्
सुगुरौ भवतात् सुदृढा भक्तिः
सुगुरौ भवतादचला च मतिः ।।

सुगुरो तव पादमहं वन्दे
न परं किंचन याचे हि गुरो ।। गुरु० ।।

डॉ. अरुणोदय न. जानी

२३

या दिविजैः संपूजिता

(गीति : मेंदी ते वावी)

या दिविजैः संपूजिता नन्दनभवकुसुमावल्या
अम्बा सा मां पृणातु ॥१॥
या शरणागतपालिनी सुरशात्रवसेनाधृष्या
अम्बा सा मां पृणातु ॥२॥
महिषासुरवित्रासिताखिलजनतावनकृतयत्ना
दुरितं सा नो लुनातु ॥३॥
पञ्चाननपृष्ठासनाऽऽदृतनानाविधरणयज्ञा
अम्बा सा मां पृणातु ॥४॥
पीतमधुरकादम्बरी स्फुरितोरुविधालघुहासा
दुरितं सा नो लुनातु ॥५॥
छादितदिनकरयामिनीश्वरहव्याशा निजभासा
अम्बा सा मां पृणातु ॥६॥
गन्धर्वैर्मुरजानकाद्यातोद्यकरैः स्तुतचरिता
दुरितं सा नो लुनातु ॥७॥
त्रिशूलचक्रगदासिभृन्नवसीधुजनितमदभरिता
अम्बा सा मां पृणातु ॥८॥
मदविह्वलनयनाम्बुजा हतसेवकजनपुरुदुरिता
दुरितं सा नो लुनातु ॥९॥

दितिजप्रलयविभावरी कृतघोरारावविशेषा
अम्बा सा मां पृणातु ॥१०॥
महिषासुरवधहर्षिताखिलसुरतोदीरितविजया
दुरितं सा नो लुनातु ॥११॥

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

३४

शुभारविन्दस्थां

(गति - परोढियाने प्होर)

शुभारविन्दस्थां, कदाचिन्, मरालराजस्थां,
नमामो देवीं जगदम्बाम् ॥ ध्रुवम् ॥
तपसा धातुःपुराविरासीद्, विमला या श्रुतिवाक् ।
मनो मनुजदनुजादितिजानाम्, अजयत्तामम्बाम् ॥
नमामो देवीं जगदम्बाम् ॥ १ ॥

धनहीने मुनिजनेऽनुकूलां पूर्णानन्दमयीम् ।
विराजितामलकरयुगवीणां सरसीरुहशुभ्राम् ॥
नमामो देवीं जगदम्बाम् ॥ २ ॥

स्वरसन्धानसुखाम्बुधिमग्नाम् अतुलामेकरसाम् ।
सरस्वतीमतिमधुरसुहासाम्, अविताखिलडिम्भाम् ॥
नमामो देवीं जगदम्बाम् ॥ ३ ॥

विषसंहरणे मयूरवाहाम्, उपदेशेऽम्बुजगाम् ।
विवेचने वरहंसासीनां, गलिताखिलदम्भाम् ।।
नमामो देवीं जगदम्बाम् ।। ४ ।।
सुभगा ओजः–प्रसादनाद्या, यत्र लसन्ति गुणाः ।
सदा सदसि विदुषामनवद्यां, निगमागमरूपाम् ।।
नमामो देवीं जगदम्बाम् ।। ५ ।।

विद्याभास्कराः पं. म. व. उपाध्यायाः

३५

मञ्जु यातु मञ्जु

मञ्जु यातु मञ्जु मनो मामकम्
धाम किञ्चिद्विलासि कृष्णनामकम् ।
ब्रह्मशक्रशर्वमुख्यनिर्जरालिसेवितम्,
ध्यानमग्नयोगिभिः स्वमानसे विभावितम् ।
वादिवृन्दकृतविवादशामकम् ।धाम० ।। १ ।।
दिवि च भुवि वियत्तले...मरुति यज्जलेऽनले,
तेजसा वृते च भाति गाढतिमिरसङ्कुले
तेज एकमेव देव तावकम् । धाम० ।। २ ।।
गर्जत्सु चाम्बुदेषु गर्जत्यथाम्बुधौ
निःस्वे च यद्विभाति हेमरौप्यशेवधौ ।
भक्तनिवहदुःखतूलदाहकम् । धाम० ।। ३ ।।

पण्डितपञ्चाननाः श्री बदरीनाथ शास्त्रिणः

३६

चकितमिह विलोकयामि

चकितमिह विलोकयामि कमलनयनमीश्वरम् ॥
कमलनयनमीश्वरं मधुरराधिकावरम् ॥ १ ॥
लोलकुसुममालिकालिपुञ्जगुञ्जनाञ्चितम् ॥
मन्दपवनचलितचेलपीतरुचिविराजितम् ॥ २ ॥
निर्निमेषदर्शनीयसुभगवदनमण्डलम् ॥
जनितशान्ति दिव्यकान्ति तरलकर्णकुण्डलम् ॥ ३ ॥
स्फुरितहसितदृश्यदशनकुन्दभासिताधरम् ।
कलितशिखिकलापमुकुटरत्नभासिभास्वरम् ॥ ४ ॥

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः

३७

कमलनयन देहि

कमलनयन देहि चरणसेवाम्...... कमल०

सौख्यमरुद्वाति यतो भावपरिमलान्वितः
नवनवसौभाग्यचयक्षोदप्रभायुतः
क्षिप्तापदुन्नतिं दिव्यप्रमुत्ततिम्..... कमल०

रसविदो न यां त्यजन्ति विरसविषयमुत्सृजन्ति
विजहति पदमैन्द्रमपि वासनाः समुन्मृजन्ति
क्षिप्तापदुन्नतिं दिव्यप्रमुत्ततिम्..... कमल०

३३

तिलकलसितकम्रभाल दीनहीनभक्तपाल
प्रार्थये भवन्तमद्य कण्ठशोभिपुष्पमाल
क्षिप्तापदुन्नतिं दिव्यप्रमुत्ततिम्..... कमल०

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः ।

३८

परिचेया परिचेया

(गति :- रंग लाग्यो चुंदडीये)

परिचेया परिचेया सौरी भाषेयम्
अध्येया विज्ञेया दिव्या भाषेयम्--

इह माधुर्यं लोकोत्तरम्, वपुरस्या अमरञ्चाजरम्
पठनीया सततं गेया दिव्या भाषेयम्--

रघुवंशादिभिरुद्दीपिता कविकुलगुरुणा परिषेविता
मननीया नैव च हेया दिव्या भाषेयम्--

सरसार्थगुरुत्वभरावनता कविभारविणा समुदं प्रणता
कमनीया हृदयं नेया सौरी भाषेयम्--

दृढबन्धसमासैरुल्लसिता भवभूतिकृतोत्तररामकथा
श्रवणीयाथाप्यवधेया सौरी भाषेयम्--

कविबाणरचितकादम्बरी सा विबुधालीकादम्बरी
हृदयालुभिरधिकं ध्येया सौरी भाषेयम्--

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः ।

३९

कवलितनवनवनीतभरित

कवलितनवनवनीतभरितमुखपङ्कजमखिलेशम् ।
वन्देमहि बल्लवललनानां मधुमयहृदयेशम् ॥
पुरुषाणामयमेकः पुरुषो वनितायूथविहारी ।
कामोन्मादकवेषो मल्लैः सह गुरुसङ्गरकारी ॥
कलाः सकलतां सन्तः सत्तां यान्ति यतोऽधीशम् । वन्दे० ॥१॥
मन्दसमीरसमीरितकुसुमावलिपरिमलजटिले ।
वृन्दाविपिने नटति मानो मे भवतु चलन्निटिले ।
प्रेमोल्लसितयशोदोत्सङ्गसुधाकरममरेशम् । वन्दे० ॥२॥
मुग्धस्मितपरिदृश्यदशनरुक्छादितबिम्बाधरे ।
मुग्धं भवतु मनो मे नयनासेचनकामृतकरे ।
गोपवधूटीकिञ्चित्कुञ्चितनयनार्चितमीशम् ॥वन्दे०॥३॥

पण्डितपञ्चाननाः श्रीवदरीनाथ शास्त्रिणः ।

४०

जय जय गिरिवरधारिन्

जय जय गिरिवरधारिन् रासविहारिन्,
दयास्तु मयि सततम् ।
याचे वसनदशां पुरतस्ते प्रसार्य काममिमम् ॥ जय० ॥
मञ्जुरणन्नवकिङ्किणिकारवमुखरं पादयुगम् ।
मम हृदये विनिवेशय चपलं शमिताखिलवादम् ॥जय०॥

रविकरनिकरमति दलयते पीताम्बरममलम् ।
निगमवचोऽतनुतन्तुकलितमिह शमयतु
पातकमखिलम् ।। जय० ।।
चन्द्रशतादुद्धृतरुचिसारविनिर्मितमिव ते वदनम् ।
आन्तरतिमिरमशेषं हरतान्मन्दस्मितसदनन् ।। जय० ।।
योगैः साङ्ख्यविचारैः किं वा क्रतुशतमपि न बलम् ।
यावत्त्वयि समुदेति न भक्तिस्तावदिदं हि खिलम् ।।जय०।।

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः ।

४१

एत, खेटकं व्रजेम भूरिवातम्

(राग : मारा वापुनी डेलिये जई)

एत खेटकं व्रजेम भूरिवातम्, मन्दमालोक्यते प्रभातम्
ब्राह्मणश्चरन् स्वादुमोदकं स्मरन् वीथीञ्च वीथीमटनम्
स्वस्ति तेऽस्तु भोः कल्याणमस्तु ते सदा ब्रूतेऽन्नभागं रटन्
कर्तरीञ्च नर्तयन् वासांसि कर्तयन् :कर्पटान् पटादाहरन्
नायकः स्वकञ्चुकं निर्माति तैर्मुदा वञ्चयन् परानाह्वरन्
सेवामिषेण पञ्चभूमिके गृहे वसन् राजत्यफल्गुवाहने
संगरे स्वयं न याति यः स देशसेवको दक्षः परोत्साहने
नागरी मनोहारिवेषं वहन्यो :दीनं वचो व्याहरेत्
पिण्डकन्तु दर्शयेद् ग्रासं न चार्पयेद् मन्दस्मितेनाह्वरेत्

पण्डितपञ्चाननाः श्रीबदरीनाथ शास्त्रिणः ।

४२

जगदम्ब राजताद्दिव्यं

(गति : उडी जा भ्रमरा तव रूपम्)

जगदम्ब, राजताद्दिव्यं तव रूपम्
मानसे सदा मे सौम्यातिभव्यम् ।। जगदम्ब....
महिषासुरमर्दिनी शुम्भासुरहन्त्री
रक्तबीजनाशिनी चण्डासुरदारिणी ।। जगदम्ब....१
दुष्टांस्त्वं मोहयसि मायया दुरत्यया
भक्तांश्च पोषयसि स्वीयार्द्रदृष्टया ।। जगदम्ब....२
अभ्यन्तरे सूक्ष्मज्योतिस्स्वरूपा
बाह्ये त्वं विश्वरूपरूपेण भ्राजसे ।। जगदम्ब....३
कल्याणकर्त्रीं भवबन्धमोचिनी
सन्मतेः प्रदात्री संसारधात्री ।। जगदम्ब....४
कैटभादिदैत्यान्स्वर्गं गमयित्री
पक्षे वसन्ती त्रिदिवालयानाम् ।। जगदम्ब....५
विश्वात्मिका त्वं कालिका परम्बा
ख्याता मृडानी शारदेति नाम्ना ।।जगदम्ब....६
हंसाधिरूढां धृतशुभ्रवस्त्रां
वन्दे सदा त्वां सज्ज्ञानधारिणीम् ।। ७

पण्डित पञ्चाननाः श्रीबदरीनाथ शास्त्रिणः ।

४३

वन्दनीयरूपे हो

वन्दनीयरूपे हो चिन्तनीयरूपे
देवि, पालय स्वकीयभक्तमण्डलम् ॥
त्वं विभासि भास्वति प्रभेति संज्ञया सदा
कान्तिरिन्दुमण्डले त्वमेव सर्वशान्तिदा ।
त्वं विचिन्त्यसे तनूनपाति याजकैर्मुदा ।
हिमांशुरम्यरूपे हिमाद्रिभव्यरूपे
देवि कालय स्वभक्तपापखण्डलम् ॥१॥
मधुश्च कैटभश्च विष्णुकर्णकच्चरोद्भवौ ॥
विष्णुनाप्यकम्पनीयसत्वशालिनावुभौ ।
मारितौ त्वयैव योगनिद्रया विमोहितौ ।
कालरात्रिरूपे भयानकाक्षिकूपे
देवि दारय स्वभक्तपापखण्डलम् ॥२॥
त्वं प्रवर्ण्यसे पराशरात्मजादिभूसुरैः ।
श्रूयसे पुराणविद्वरैः प्रवर्णिता नरैः ।
गीयसे त्वमेव सामगीतिभिः सदाध्वरे ।
वैष्णवीस्वरूपे शाम्भवीस्वरूपे
देवि तारयेः संसृतेस्तु तुण्डिलम् ॥३॥

पण्डितपञ्चानना: श्रीबदरीनाथ शास्त्रिण: ।

४४

पर्वपुण्ययामिनी

पर्वपुण्ययामिनी प्रमोदमन्तरे किरेत्
चन्द्रमा महीतले मनःप्रसादमीरयेत् ॥
त्वद्विना श्रियः पते तत्कथं नु सम्भवेत्
स्वागतं नाथ ते समीहे

भूमौ सहस्राणि लोकयन्तु कामं
पत्तनानि वा काननानि
वृन्दावनस्य रम्यतास्ति नैव कुत्रापि
सन्तु वा तानि दैवतानि...हो...यामिनी०
प्रमोदमन्तरे० ॥१॥

पूर्णचन्द्रमण्डलानि सन्तु वा सहस्रं
वेधसा सयत्ननिर्मितानि
श्रीमुखस्य शोभां न यान्ति नन्दसूनो
वारितां पतत्रिणामितानि....हो...यामिनीं०
प्रमोदमन्तरे० ॥२॥

पण्डित पञ्चाननाः श्रीबदरीनाथ शास्त्रिणः ।

४५

वासन्ति चन्द्रिके

(मण्डलगानम)

ध्रुवपदम् - वासन्ति विलसन्ति माधवसुचन्द्रिके ।

कोकिलशुकसारिका, मयूर नादनादिते
धीरनीरचारिहंस, सारससमुज्ज्वले
मन्दानिलदोलिनलिनवीजिते
वासन्ति विलसन्ति माधवसुचन्द्रिके ॥१॥

धर्मांशुतापनोदिसरसीसुखमज्जने
सूक्ष्मशुभ्रचैलावृतनारीमुखचन्द्रके
पूर्णेन्दुमण्डलेन मण्डिते वासन्ति चन्द्रिके
वासन्ति विलसन्ति माधवसुचन्द्रिके ॥२॥

धवलाम्बरधारिगगनताराविराजिते
पीयूषपानमत्तविद्याधरसंस्तुते
विद्वत्समाजगीतकीर्तिके वासन्ति चन्द्रिके
वासन्ति विलसन्ति माधवसुचन्द्रिके ॥३॥

भारतीयवेदधर्मविजयगानहेतवे
रसिकमनोह्लादिदेववाणीसमुद्धरे
बद्धादरविदुष:सभाजयेः, वासन्ति चन्द्रिके
वासन्ति विलसन्ति माधवसुचन्द्रिके ॥४॥

पं. लक्ष्मीशंकर गो. शुक्लाः ।

४६

मण्डलगानम्

ध्रुवपदम् - अयि मङ्गलदायिनि विश्वविलासिनि मातः
त्वच्चरणं शरणं यामि ।

कामशतेषु मनो मे लीनम्, संसृतिजालशतैरवगूढम्
मुग्धं दिव्यसुखप्रदभोगैः धारय मज्जदशेषकरैस्त्वम् ।।१।।

शुम्भनिशुम्भौ बुद्धिनिलीनौ, चण्डो मुण्डः क्रोधनिगूढौ,
मधुकैटभलीना रसना मे, शोधय देहगतानसुराँ
स्त्वम् ।।२।। अयि

निगमागमसाराः सन्तोऽपि, मानसमोहनिराकरणाय,
कि प्रभवो जगदम्ब मतास्ते, त्वत्करुणाघनसेचनहीनाः
।।३।। अयि

लक्ष्मीः शङ्करणी मनुजानाम्, भूयान्मानसतोषकरी किम्?
विद्या त्वद्गुणगानरता नो, यातं जीवनमखिलं विफलम्
।।४।। अयि

वाणी नृत्यति तारतरङ्गैः, देहः प्रणमति दण्डवदेषः ।
कं को नौति न जाने मातः त्वन्मयतामखिले सम्पेयुषि
।।५।। अयि

पं. लक्ष्मीशंकर गो. शुक्लाः ।

४७

मण्डलगानम् (अष्टपदी) ।

(ध्रुवपदम् जय जय दत्त गुरो)

अवतरणावितभूतल त्रिगुणात्मक ए
वररुचिरोचितलोक, जय जय दत्त गुरो ॥१॥

धूलिधवलतनुराजित, त्रिदशेश्वर ए
तरणिशतोज्ज्वलरूप, जय जय दत्त गुरो ॥२॥

चिन्तितदानपरायण, सृतितारक ए
तनुतररूपशतेश, जय जय दत्त गुरो ॥३॥

नतजनपापविलोपन, धृतिदायक ए
श्रीसुखदानपतीश, जय जय दत्त गुरो ॥४॥

गुणिजनमानसकन्दरं महसा भर ए
रुतिमृतिमुक्तिकरेश, जय जय दत्त गुरो ॥५॥

देव दयाम्बुधिमज्जितं, मनुजं कुरु रे
वरसुखशान्तिनिधान, जय जय दत्त गुरो ॥६॥

दत्तपदस्मरणाहताखिलबन्धन ए
तत्पदशोषितरूप, जय जय दत्त गुरो ॥७॥

रङ्गपदे रजसा युतम्, सहसा भज रे,
भवभयपारपरेश, जय जय दत्त गुरो ॥८॥

पं. लक्ष्मीशंकर गो. शुक्लाः ।

४८

मण्डलगानम् ।

‘ शिवशरणम् ’

जय शिव शूलिन्, साम्ब सनातन, विश्वविधातः,
पाहि विभो (ध्रुवपदम्)

सुरनरकिन्नर, यक्षहृदन्तः, चित्कलया रममाण विभो
॥१॥ जय शिव०

संसृतिजालमिदं विधिवशगं, भ्राम्यति सततं मोहमयम् ।
दुःखशतार्णव तुङ्गतरङ्गोत्तरलं ते चरणं श्रयते
॥२॥ जय शिव०

प्रकृतिपूरुषशक्तिशिवौ वां, भेदधियाऽहं नो कलये ।
एकमनेकविभेदविभिन्नं, दीप्तमखण्डं नौमि विभो
॥३॥ जय शिव०

सत्त्वरजस्तमसामधिपत्वं, धत्से विधिहरिरूपेन स्तः ।
गिरिजाषण्मुखगणनाथाः के, विभुमेकं त्वामाकलये
॥४॥ जय शिव०

मायामोहविनष्टधियां किं, सत्त्वमुपैति मनो विभ्रान्तम् ।
नो धत्ते करुणार्द्रकटाक्षान्, यावन्नाथ सुधारससिक्तान्
॥५॥ जय शिव०

पं. लक्ष्मीशंकर गो. शुक्लाः।

४९

स्वागतगीतम् ।

'स्वागतमिह भवताम्'

कमलदलोच्छलदम्बुकणाभं, मानसममलं दधताम् ।
सुमनोभिः पदकमले विनताः कुर्मः, स्वागतमिह
भवताम् ।। (ध्रुवपदम्) ।

निगमागममन्थनपीयूषं पायं पायं हसताम् ।
भारतजीवनमूलनिदानं, गुणगरिमाणं वहताम् ।।२।।
कमलदलो०

निजपरभावविहीन स्वात्मानन्दे सुचिरं चरताम् ।
दोषज्ञापयशः प्रविधुवतां गुणवत्सुषमां भजताम् ।।३।।
कमलदलो०

सद्वाचा रसनिर्झरहृदयैरमलैश्चरितैरुज्ज्वलताम् ।
संस्कृतिसंस्कृतरक्षणमनसां त्रिभवनपूजितमहसाम् ।।४।।
कमलदलो०

पं. लक्ष्मीशंकर गो. शुक्लाः ।

५०

मण्डलगानम् ।

'शारदाम्बास्तुतिः'

'शारदे तवातिरम्यपादयोर्मानसं सदैव मोदताम् । ध्रुव०
विश्वागमवारिधिप्रभूततत्त्वमौक्तिके
वाल्मीकिगीतरम्यरामचरितसत्कथे ।
द्वैपायनसंकलितपुण्यमहाभारते – शारदे तवाति० १
भासकालिदासबाणभवभूतिसेविते
काव्यनाट्यगीतकलाशिल्पचयैर्भूषिते ।
हृदयकुहरनादतारझङ्कारमोदिते – शारदे तवाति० २
पारिजातगन्धमत्तभृङ्गावलिगुञ्जिते
वीणारवमूर्च्छदमलगीतिरागरञ्जिते ।
शारदेन्दुविशदविभाभासितमुखपङ्कजे–शारदे तवाति० ३
पापोदधिमोहनक्रगलितचरणमुद्धरेः
विषयतीव्रमद्यविगतधीधनान् न विस्मरेः ।
कामजालपतितमूढमानवं विबोधयेः – शारदे तवाति० ४
पावनतमवेदमन्त्रसम्पूरितदिङ्मुखम्
विमलचरितछात्रसङ्घभासा विभासितम् ।
पश्य सुधावर्षिसदयदृङ्निपातनैर्जनम् – शारदे तवाति० ५

पं. लक्ष्मीशंकर गौ. शुक्लाः ।

५१

मण्डलगानम् ।

'पालय हे भगवन्, मङ्गलमय करुणामय' (ध्रुवपदम्)

जनिमृतिसंसृतिजाले मग्नम्, तापत्रयसंतापितमनुजम् ।
ममतातुङ्गतरङ्गोच्चलितं, नष्टदिशं परमूढम् ॥१॥
पालय हे भगवन्०

कामसमीरणदोलितचित्तम्, कोपानलपरिदाहितदेहम् ।
लोभमहाम्बुधिभङ्गोच्छलितम्, पश्य सदय दयनीयम् ॥२॥
पालय हे भगवन्०

विषयविलासपरं परमोदम्, धनसुतजायापाशनिबद्धम् ।
नित्यमिदं सकलं मन्वानं, वारय निरयनिलीनम् ॥३॥
पालय हे भगवन्०

त्वल्लीलापरिभावितजगताम्, भूयात्तव मम सर्वमधीनम् ।
इत्याशाशतकुण्ठितबुद्धिम्, कालवृकाननलीनम् ॥४॥
पालय हे भगवन्०

त्वं माता जनको भ्राता मे, भार्या मित्रं परमगुरुस्त्वम् ।
सकलं न्यस्तं चरणयुगे ते, पारय भवजलपारम् ॥५॥
पालय हे भगवन्०

पं. लक्ष्मीशंकर गो. शुक्लाः ।

५२

मण्डलगानम् ।

(तव चरणं शरणं यामि विभो (२) ध्रुवपदम्)

तव चरणं शरणं यामि विभो,
तव चरण शरणं यामि विभो ।
न हि जनने मरणे मेऽभिरुचिः,
मम चेतस्त्वच्चरणे रमते ॥१॥ तव०
मायारहितः सहित इवास्से,
नैकविरूद्धतनूः संश्रयसे ।
नट इव नाटयसे जगदेतत्,
यातः क्रीडनतामहमेवम् ॥२॥ तव०
कारणरूपो निर्लेपः सन्,
चरसि जगत्यविकलरूपस्त्वम् ।
भावय भवदावानलदीप्तम्,
करुणार्णवहिमसीकरसेकैः ॥३॥ तव०
निरपेक्षस्त्वं सदपेक्षस्त्वम्,
दयसे मनुजाननुजानिव किम् ।
दुर्ललिताँलल्लितैरनुपश्यसि,
राजसभावसमावृतसत्त्वान् ॥४॥ तव०
भ्रामं भ्रामं श्रान्तौ चरणौ,
नामं नामं देहः खिन्नः ।
नो लब्धाः करुणार्द्रकटाक्षाः,
त्वच्चरणावपहाय हतानाम् ॥५॥ तव०

पं. लक्ष्मीशंकर गो. शुक्लाः ।

५३

मण्डलगानम्

किं तन्न न यत्र शम्भो........भूमा विराजते ते
(२) ....भूमा विराजते ते

१ अभ्यन्तरा बहिस्त्वं जडचेतनासवस्त्वं
सर्वत्र सर्वदैवं........(२) महिमावभासते ते....
भूमा विराजते ते

२ भास्वाननुष्णभानु ग्रंहतारकाः कृशानुः
पवनो वनं महीन्द्रा...(२) लीला विलक्षणास्ते
...भूमा विराजते ते

३ गगनावकाशरूपे सदसद्व्दयानुरूपे
त्वयि निर्मला मतिर्मे ...(२) स्थिरतामुपैतु शान्ते
...भूमा विराजते ते

४ नीत्वा निरक्तभोगिन् नित्यं विरक्तभोगिन्
सत्वं जगन्न यस्मिन् प्रेमा तवातिशेते...
भूमा विराजते ते

५ प्रकृतिः परा सवित्री धात्री जगन्नियन्त्री
गिरिजानिजानुरागाद्......(२) हृदयं तवाधिशेते
....भूमा विराजते ते

त्वमणुर्महान् गरिष्ठो लघुरव्ययो वरिष्ठः
सकलस्त्वमेव शम्भो......(२) तस्मै नमो नमस्ते
.....भूमा विराजते ते

विद्याभास्कराः पं. म. व. उपाध्यायाः ।

५४

प्रार्थना

तव कृपा शङ्कर विजयताम्
अवताम् माद् सुर-वाञ्छिता
हे साम्ब शिव वाम सुमते
नटराज राजन् नमो नमः

कल्याणमार्गविहारिणा
भुवने भीतिविदारिणा
शं कुरुते मृदङ्गध्वनिना
नटराज राजन् नमो नमः

शुभज्ञानदाता भुवने
तपसि स्थितोऽत्र कानने
जनसुखविधाता ते मुने
नटराज राजन् नमो नमः

सुरासुरवृन्दवन्दिते
हिमगिरिसुतासेविते
पदकमले त्रिलोचन ते
नटराज राजन् नमो नमः

रचयिता—प्रद्युम्न शुक्लः ।

५५

रासे हरिमिह विहितविलासम्

रासे हरिमिह विहितविलासम् ॥ स्मरति मनो मम
कृतपरिहासम् ॥ ध्रुवम् ॥

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम् ।
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ॥१॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेषम् ॥२॥

विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रम् ।
करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रम् ॥३॥

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ॥४॥

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपि नरङ्गदनङ्गदृशा मनसा रमयन्तम् ॥५॥

श्री जयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् ॥३॥

गीतगोविन्दकाव्यम् ।

५६

शान्तमनाः कोऽपि योगिराड्

(गतिः खम्मा मारा नन्दजीना लाल)

शान्तमनाः कोऽपि योगिराड्, राजते रेवोपतीरे ।

दत्तमना मानवस्वराड् राजते रेवोपतीरे ।।
दूरतरं भू-तिमिरं, स्वीयेन हि तापसेन,
तेजसा करोति योगिराड्, राजते रेवोपतीरे ।।
शान्तमनाः कोऽपि ।।१।।

दृप्ततमा उन्नमिताः, शंला इव शाखिनोऽपि,
वन्दमानमस्तका विराड्, राजते रेवोपतीरे ।।
शान्तमनाः कोऽपि ।।२।।

केचिदाहुरत्रिसुतं, दत्तं दुरितौघहं च,
विठ्ठलजं कोऽपि योगिराड्, राजते रेवोपतीरे ।।
शान्तमनाः कोऽपि ।।३।।

दत्तदत्तमन्त्रमसौ, श्वासं परिरारटीति,
धौतशुद्धवाससा विराड्, राजते रेवोपतीरे ।।
शान्तमनाः कोऽपि ।।४।।

मानवके मानवके, व्याप्तामपि पश्यतीह,
ईशकलामेष योगिराड्, राजते रेवोपतीरे ।।
शान्तमनाः कोऽपि ।।५।।

याहि मणे तच्चरणे, पुण्योदयलब्धयोग,
स्नेहसुधासागरस्वराड्, राजते रेवोपतीरे ।।
शान्तमनाः कोऽपि ।।६।।

वि. भ. व. उपाध्यायाः

५७

रङ्गपादपद्मसमाराधनम्

रङ्गपादपद्मसमाराधनं सर्वसम्पत्प्रदं सिद्धिसाधनम् ।।
पाप, ताप, शाप, दारि दारणं दुरापदाम् ।
दत्तपाददर्शनाय साधनं सुसम्पदाम् ।
त्यागरागभोगयोगभाजनं सर्वसम्पत्प्रदं
सिद्धिसाधनम् ।।१।।

दिव्यबोधदानकारि दर्शनानुरागकारि ।
रोषदोषकोशहारि मङ्गलप्रदानकारि ।
ध्यानधारणादियोगभावनं, सर्वसम्पत्प्रदं सिद्धिसाधनम्
।।२।।

नर्मदासुनीरपानसम्मदेन शोभितम् ।
कोकिला, मयूर, मत्तपन्नगानुमोदितं ।
दिव्यभौमसर्वजन्तुपावनं, सर्वसम्पत्प्रदं
सिद्धिसाधनम् ।।३।।

कल्पवृक्षगर्वभक्षिनिम्बशाखिनस्तले
दत्तपादपङ्क्तिभिः पवित्रितेऽतिशीतले
ब्रह्मदर्शनाधिकारसाधनं, सर्वसम्पत्प्रदं
सिद्धिसाधनम् ।।४।।

रुक्मिकाम्बिकाकृपाकटाक्षरक्षितायुषो
मणेरुपासनीयवामदेवभक्तिमीयुषः
सवलोकरोगशोककशामकम् । सर्वसम्पत्प्रदं
सिद्धिसाधनम् ।।५।।

वि. म. व. उपाध्यायाः

५८

गीतम्

(गति : डफलीवाले डफलीबजा)

मुरलीधारिन्, वितर कृपां
तव चरितं राजते हे.......
शं कुरु, त्वं मुदा.........
शुभगुणसहिते तव पदकमले
भावो वर्धतां सदा मे......
सदैकतृष्णा, हे कृष्ण हे कृष्ण
त्वयाहं पालनीयो हे .....
कृष्णे हि भावं, हृदय न कामं
सदाहं याचे मुरारे......
स्वतु तव चरितं - हरतु च शमलं
हरिं प्रयातु मनो मे .....
दुष्टोऽपि स्वामि हे देव देव
न जातु नाशनीयो हे.....

हरौ हि निष्ठां नहि भोगनिष्ठां
सदाहं याचे मुरारे......

प्रद्युम्म शास्त्री

५९

(वादलडी वरसोरे सरोवर छलीबन्या)

शारदां भजामो रे, देवोपमजनैः स्तुताम्
पालनीयां प्रमुखां रे, नमनीयां सुखदां रे (ध्रुव)
श्वेताम्बरां रुचिरां रे, क्षीरोपमां गिरां सदा
सेवामहे ताम् (२) भारते रे देवोपमजनैः स्तुताम्
गेयां द्विजैः पणितां रे, श्रेयोयुतां, वयं मुदा
सेवामहे ताम् (२) भारते रे देवोपमजनैः स्तुताम्
ध्येयां बुधैर्भणितां रे, विद्याप्रदां धिया सदा
सेवामहे ताम् (२) भारते रे देवोपमजनैः स्तुताम्
वेदोदितां शुभदां रे, पद्मासने स्थितां मुदा
सेवामहे ताम् (२) भारते रे देवोपमजनैः स्तुताम्
वीणाधरां सुशयां रे, मालायुतां शिवां सदा
सवामहे ताम् (२) भारते रे देवोपमजनैः स्तुताम्
शब्दात्मिकां सरसां रे, भावात्मिकां गिरां मुदा
सेवामहे ताम् (२) भारते रे देवोपमजनैः स्तुताम्
ज्ञानोदधौ सुखतरणिं रे, काव्यात्मिकां सुधां सदा
सेवामहे ताम् (१) भारते रे देवोपमजनैः स्तुताम्

प्रद्युम्न शास्त्री

६०

मण्डलगानम्

(मारी शेरीयेथी कानकुंवर आवतारे लोल)

हे भारतदेशोऽस्ति देव ज्ञानदायको रे लोल
वेदैर्हि ब्रह्मप्रकाशको रे लोल (ध्रुव)
हे शङ्करदेशिकैर्जिता वेददूषका रे लोल
मिथ्यैव विश्वं प्रकीर्तितं रे लोल
हे रामानुजैर्नुतं सविशिष्टं 'रे लोल
अद्वैततत्वं सुचर्चितं रे लोल
हे पूर्णप्रज्ञैस्तु भेदज्ञानबोधितं रे लोल
त्वं तस्येति सुचारुभाषितं रे लोल
हे वल्लभदेशिकैः सर्वदेव निर्मलं रे लोल
अद्वैतरूपं सुस्थापितं रे लोल
हे गङ्गादि तोयानि भारते वहन्ति रे लोल
पापस्य तानि शोधकानि रे लोल
हे विष्णुनाऽवतारैर्धर्मः सुरक्षितो रे लोल
कृष्णेन गीता प्रबोधिता रे लोल
हे भारतदेशस्तु कल्पपादपायते रे लोल
सज्जनैः सदा सुसेव्यते रे ललो

प्रद्युम्न शास्त्री

६१

– सुरवाक्प्रशस्तिः –

जगतीतलेऽनवद्या परिचीयतां सुविद्या ।
सुरभारतीनिबद्धा गुणमालिकासमृद्धा ॥

पृतनावली सुसज्जैरपि दुर्जया नृपालैः ।
अनया विनम्रवक्त्रा विजिता क्षणादविद्या ॥

परिलब्धकोटिवित्तैर्धनिकैरगम्यतत्त्वः ।
अनयाञ्जसोपदिष्टः श्रितयाऽत्युदारभावः ॥

मधुदुग्धशर्करौघे मधुरत्वसंप्रतीतिः ।
ननु तावदेव पुंसां विदिता न यावदेषा ॥

शुचिशुद्धभानुबिम्बे सुदृशा कदाप्यदृष्टः ।
अनया नु कोऽपि चित्ते परिलोक्यते प्रकाशः ॥

धनिनो विनैव वित्तं जयिनो विनैव युद्धम् ।
विबुधाः श्रिता य एनां कृतिनो विनैव कृत्यम् ॥

कवलीकरोति कालो जनतामदृष्टतत्त्वाम् ।
सुयशःशरीरभाजो विबुधाँस्तु वर्जयित्वा ॥

इह वर्तते वसिष्ठः स च बादरायणर्षिः ।
बिलतः प्रपन्नजन्मा कपिलः स गौतमोऽपि ॥

हृदयालवः सलोभा न सुखे सुरालयेऽपि ।
हृतचेतसो विलासैः कविकालिदासवाचाम् ॥

शतकं तु वत्सराणांन गतं कदापि भूमौ ।
शतशो न यत्र जाताः सुरभारतीरसज्ञाः ॥

वपुषः प्रपोषहेतोः कलयन्ति केऽप्युपायान् ।
मनसो विकासहेतुः कथयेह काऽस्त्यतोऽन्या ॥

मणिभूषणं गतोऽपि श्रियमुज्ज्वलामवाप्तः ।
स तदैव लोकसेव्यः कवयो यदैनमीयुः ॥

कमलं मलप्रभूतं शशलाञ्छनोऽलिरब्धिः ।
गमिताः परां प्रतिष्ठामनयैव दोषिणोऽपि ॥

न हि सन्ति तत्र पिण्डा घृतशर्कराविमिश्राः ।
इति संगदन् न रिक्तोऽस्त्युदरम्भरित्वदोषात् ॥

समवाप्तभूरिमानाः श्रितयाऽन्यभाषया ये ।
अवयन्तु शिक्षितास्ते सुरवाग्विचारदक्षैः ॥

द्युतिमेति दर्पणं यत् कृतसख्यमातपेन ।
महिमा विवस्वतोऽयं सततप्रतापधाम्नः ॥

बहिरङ्गवीक्षणैकप्रवणा विचक्षणा ये ।
मतिरन्तरङ्गतत्त्वे श्लथतामुपैति तेषाम् ॥

प्रतिबद्धमस्ति चेतो सह सञ्चयैर्धनानाम् ।
सुशको न हन्त तेषां सुरवाग्रसोपभोगः ॥

साहित्यसुधानिधिः, श्री बदरीनाथ शास्त्री

शिवाशंसा ।

वयं व्रजामः, स्वं गेहं जय जय बन्धो !
शिवमिच्छामोऽसन्देहं ,, ,, ॥ १ ॥
साध भवद्भिः सत्कृता ,, ,, ॥
उत्सवकर्मणि संस्मृता ,, ,, ॥ २ ॥
आगामिनि वर्षे पुनर् ,, ,, ॥
भवेत यूयं सन्नद्धा ,, ,, ॥ ३ ॥
अद्य कुरुत चामन्त्रणम् ,, ,, ॥
भवेम वयमपि संबद्धा ,, ,, ॥ ४ ॥
कंसारञ्च सशर्करं ,, ,, ॥
भुञ्जीमहि चातःपरम् ,, ,, ॥ ५ ॥
संसेव्या विद्वत्सभा ,, ,, ॥
सुरभाषा–संवर्धिनी ,, ,, ॥ ६ ॥
भवत सदस्या आशु भो ,, ,, ॥
सा पीयूषस्पर्धिनी ,, ,, ॥ ७ ॥

———

संस्कृतविद्वत्सभागीतम् ।

नन्दनविपिनं भारतम् ।

देवतरुः स च सकलमनोरथपूरणकुशलो भाति ।
धर्म्मं इहापि जनानामीहाप्राणपरो नु चकास्ति ।। नन्दन०

अमरसरित्कल्लोलततिः सा लेखा यत्र स्नान्ति ।
प्रमुद इहापि च गङ्गास्नाने नॄणां मनांसि न मान्ति ।। नन्दन०

नृत्यत्सुरललनानिवहः स च लीलाललितं याति ।
विविधविलासैरिह सुरभाषा मोदमतुलमनुराति ।। नन्दन०

वाचस्पतिरमरानधिधर्मं किमपि च किमपि च शास्ति ।
गुरुणा करुणानिधिनाऽऽदिष्टं जनो नयं न जहाति ।। नन्दन०